सर्वसंस्कारा इति या वासना स्थिरा। स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते। प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा। चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः। अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते। सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः। आकारसहिता बुद्धिर्योगाचारस्य सम्मता। केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः। रागादिज्ञानसन्तानवासनाच्छेदसम्भवा। चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता। कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्वाह्णभोजनम्। सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिरिति"।

**बुद्धगया** स्त्री (बुधगया) प्रसिद्धे कीकटस्थे बुद्धानां गयाभेदे।

**बुद्धद्रव्य** न० स्तौपिके स्तूपीकृते द्रव्ये त्रिका०।

**बुद्धधर्म्म** पु० ६त०। बुद्धानामहिंसादौ धर्म्मे।

**बुद्धपुराण** न० बुद्धस्याविर्भावादिज्ञापके पुराणभेदे।

**बुद्धान्त** पु० बुध-भावे क्त तस्यान्तः परिच्छेदः। जीवस्यावस्थाभेदे जाग्रदवस्थायाम् शत० ब्रा० १४। ७।१।१८।

**बुद्धि** स्त्री० बुध-क्तिन्। १ज्ञाने, २सांख्योक्ते सुखदुःखाद्यष्टविधधर्मयुते प्रकृतिपरिणामभेदे "महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते" सां० प्र० भा० धृतवाक्यम्। वेदान्तोक्ते निश्चयात्मकवृत्तियुते ३अन्तःकरणे च। "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयो निश्चयो गर्वः स्मरणं विषया अमी" वेदान्तप०। ४धर्मपत्नीभेदे भा० आ० ६६ अ०। कणा० सूत्रोपस्कारवृत्तौ सांख्यमतसिद्धमहत्तत्त्वरूपबुद्धितत्त्वनिराकरणेन बुद्धेर्ज्ञानपर्य्यायता तद्भेदाश्चोक्ता यथा "द्रव्येषु ज्ञानं व्याख्यातम्" सू० "विषयेण विषयिणं तृतीयाध्यायस्थसूत्रमुपलक्षयति। "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" "आत्मेन्द्रियार्थसन्निकर्षाद्धि यन्निष्पद्यते तदन्यत्" इत्येताभ्यां सूत्राभ्यां ज्ञानं व्याख्यातमित्यर्थः"। तत्र "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्य्यायाः" गौ० सू०। समानतन्त्रे बुद्धिलक्षणे साङ्ख्यमतनिरासार्थं पर्य्यायाभिधानम्। साङ्ख्या हि बुद्ध्यादिशब्दानामर्थभेदमाचक्षते तथा हि सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा चैकैव पुरुषास्तु परं भिद्यन्ते ते च कूटस्था नित्या अपरिणामिनो नित्यचैतन्यस्वभावाः ते च पङ्गवोऽपरिणामित्वात् प्रकृतिस्त्वन्धा जडत्वात् यदा विषयभोगेच्छा प्रकृतिपुरुषभेददिदृक्षा च प्रकृतेर्भवति तदा सा पुरुषोपरागवशात् परिणमेत् तस्यास्त्वाद्यः परिणामो बुद्धिरन्तःकरणविशेषः बुद्धिरेव महत्तत्त्वं तदुक्तम् "प्रकृतेर्महान्" इति सां० सू०। सा च बुद्धिर्दर्पणवदच्छा सत्त्वा तस्याश्च बहिरिन्द्रियप्रणाडिकया विषयाकारो यः परिणतिभेदो घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरिति चाख्यायते स्वच्छायां बुद्धौ वर्त्तमानेन ज्ञानेन चैतन्यस्य पुरुषस्य भेदाग्रहादहं जानामीति योऽभिमानविशेषः सैवोपलब्धिः। स्रक्चन्दनादिविषयसन्निकर्षादिन्द्रियप्रणाडिकयैव सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः। अतएव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माऽधर्माः सर्वएव बुद्धेः परिणामविशेषाः सूक्ष्ममात्रया प्रकृतावेव वर्त्तमाना अवस्थाभेदादाविर्भवन्ति तिरोभवन्ति च। पुरुषस्तु पुष्करपलाशवन्निर्लेपः प्रतिबिम्बते परं बुद्धाविति यन्मन्यन्ते। तदनेन पर्य्यायाभिधानसूचितप्रमाणेन निराक्रियते तथा हि बुद्धिशब्दो यदि बुध्यतेऽनयेति करणव्युत्पन्नस्तदा मन एव तत्पर्य्यवस्यति नच मनः प्रत्यक्षम् बुद्धिस्त्वहं बुध्ये इति प्रत्यक्षवेद्यैव। नचान्तःकरणस्य ज्ञानाद्याधर्माः कर्त्तृधर्मत्वेनैव तेषां सिद्धेः भवति हि अहं जाने अहं प्रत्येमि अहमुपलभे इत्यहन्त्वसामानाधिकरण्येन प्रतिभासः। अभिमानोऽसाविति चेत् तात्त्विकत्वे बाधकाभावात्। पुरुषस्यागन्तुकधर्मानाधारत्वं कूटस्थत्वं तदेव बाधकमिति चेन्नागन्तुकधर्माधारत्वेऽपि नित्यत्वसम्भवात् न हि धर्मी धर्मश्चेत्येकं तत्त्वं येन धर्मोत्पादविनाशावेव धर्म्युत्पादविनाशौ स्यातां तथा च यएव चेतयते स एव बुध्यते जानात्युपलभ्यते प्रत्येति चेति नार्थान्तरकल्पना युक्तेति दिक्। तत्र ज्ञानं द्विविधं विद्या चाविद्या च विद्या चतुर्विधा प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा। अविद्याऽपि चतुर्विधा संशयविपर्य्ययस्वप्नानध्यवसायलक्षणा। तत्र यल्लैङ्गिकं तदनिन्द्रियजम् कुतएतदित्याह" उप० वृ०। "तत्रात्मा मनश्चाप्रत्यक्षे" कणा० सू०। "आत्माऽत्र परात्मा स्वात्मा वा स्वात्मनि मानसस्य कादाचित्काहम्प्रत्ययस्याहं गौरः कृशो महाबाहुरित्यादिप्रत्ययतिरस्कृतत्वात् स्वात्मनोऽप्यप्रत्यक्षतोक्ता। चकारादाकाशकालदिशां वायोः परमाणूनाञ्च द्रव्याणामुपसंग्रहः। इन्द्रियजमपि द्विविधं सर्वज्ञीयमसर्वज्ञीयञ्च सर्वज्ञीयं योगजधर्मलक्षणया प्रत्यासत्त्या तत्तत्पदार्थसार्थज्ञानं तथा हि परमाणवः प्रत्यक्षप्रसक्ताः प्रमेयत्वादभिधेयत्वात् सत्त्वात्। सामग्रीविरहात् कथमेवं महत्त्वस्यापि प्रत्यक्षं प्रति कारणत्वात् न च परमाणवो महान्तः रूपवत्त्वस्यापि चाक्षुषप्रत्यक्षकारणत्वात् न च दिगादयो रूपवन्त